# Yoni Stotram

# યોનિસ્તોત્રમ્

## Document Information

Text title : Yoni Stotram

File name : yonistotram.itx

Category : devii, devI, stotra

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Latest update : June 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2026

*sanskritdocuments.org*

# Yoni Stotram

# યોનિસ્તોત્રમ્

મહાદેવ ઉવાચ ।
શૃણુ દેવિ સુર-શ્રેષ્ઠે સુરાસુર નમસ્કૃતે ।
ઇદાનીં શ્રોતુમિચ્છામિ સ્તોત્રં હિ સર્વદુર્લભમ્ ।
યસ્યાવબોધનાદ્દેહે દેહી બ્રહ્મમયો ભવેત્ ॥ ૧॥

શ્રીપાર્વત્યુવાચ ।
શૃણુ દેવ સુરશ્રેષ્ઠ સર્વ-બીજસ્ય સમ્મતમ્ ।
ન વક્તવ્યં કદાચિત્તુ પાખણ્ડે નાસ્તિકે નરે ॥ ૨॥

મમૈવ પ્રાણ-સર્વસ્વં લતાસ્તોત્રં દિગમ્બર ।
અસ્ય પ્રપઠનાદ્દેવ જીવન્મુક્તોઽપિ જાયતે ॥ ૩॥

ૐ ભગ-રૂપા જગન્માતા સૃષ્ટિ-સ્થિતિ-લયાન્વિતા ।
દશવિદ્યાસ્વરૂપાત્મા યોનિર્માં પાતુ સર્વદા ॥ ૪॥

કોણ-ત્રય યુતા દેવિ સ્તુતિ-નિન્દા વિવર્જિતા ।
જગદાનન્દ-સમ્ભૂતા યોનિર્માં પાતુ સર્વદા ॥ ૫॥

રક્ત-રૂપા જગન્માતા યોનિમધ્યે સદા સ્થિતા ।
બ્રહ્મ-વિષ્ણુ-શિવ-પ્રાણા યોનિર્માં પાતુ સર્વદા ॥ ૬॥

કાર્ત્રિકી-કુન્તલં રૂપં યોન્યુપરિ સુશોભિતમ્ ।
ભુક્તિ-મુક્તિ-પ્રદા યોનિઃ યોનિર્માં પાતુ સર્વદા ॥ ૭॥

વીર્યરૂપા શૈલપુત્રી મધ્યસ્થાને વિરાજિતા ।
બ્રહ્મ-વિષ્ણુ-શિવ શ્રેષ્ઠા યોનિર્માં પાતુ સર્વદા ॥ ૮॥

યોનિમધ્યે મહાકાલી છિદ્રરૂપા સુશોભના ।
સુખદા મદનાગારા યોનિર્માં પાતુ સર્વદા ॥ ૯॥

કાલ્યાદિ-યોગિની દેવી યોનિકોણેષુ સંસ્થિતા ।

મનોહરા દુઃખ લભ્યા યોનિર્માં પાતુ સર્વદા ॥ ૧૦॥

સદાશિવો મેરુ-રૂપો યોનિમધ્યે વસેત્ સદા ।
કૈવલ્યદા કામમુક્તા યોનિર્માં પાતુ સર્વદા ॥ ૧૧॥

સર્વ-દેવ સ્તુતા યોનિઃ સર્વ-દેવ-પ્રપૂજિતા ।
સર્વ-પ્રસવકર્ત્રી ત્વં યોનિર્માં પાતુ સર્વદા ॥ ૧૨॥

સર્વ-તીર્થ-મયી યોનિઃ સર્વ-પાપ-પ્રણાશિની ।
સર્વગેહે સ્થિતા યોનિઃ યોનિર્માં પાતુ સર્વદા ॥ ૧૩॥

મુક્તિદા ધનદા દેવી સુખદા કીર્તિદા તથા ।
આરોગ્યદા વીર-રતા પઞ્ચ-તત્ત્વ-યુતા સદા ॥ ૧૪॥

યોનિસ્તોત્રમિદં પ્રોક્તં યઃ પઠેત્ યોનિ-સન્નિધૌ ।
શક્તિરૂપા મહાદેવી તસ્ય ગેહે સદા સ્થિતા ॥ ૧૫॥

તીર્થં પર્યટનં નાસ્તિ નાસ્તિ પૂજાદિ તર્પણમ્ ।
પુરશ્ચરણં નાસ્ત્યેવ તસ્ય મુક્તિરખણ્ડિતા ॥ ૧૬॥

કેવલં મૈથુનેનૈવ શિવ-તુલ્યો ન સંશયઃ ।
સત્યં સત્યં પુનઃ સત્યં મમ વાક્યં વૃથા નહિ ॥ ૧૭॥

યદિ મિથ્યા મયા પ્રોક્તા તવ હત્યા-સુપાતકી ।
કૃતાઞ્જલિપુટો ભૂત્વા પઠેત્ સ્તોત્રં દિગમ્બર ! ॥ ૧૮।
સર્વતીર્થેષુ યત્ પુણ્યં લભતે ચ સ સાધકઃ ।
કાલ્યાદિ-દશ-વિદ્યાશ્ચ ગઙ્ગાદિ-તીર્થ-કોટયઃ ।
યોનિ-દર્શન-માત્રેણ સર્વાઃ સાક્ષાન્ન સંશય ॥ ૧૯॥

કુલ-સમ્ભવ-પૂજાયામાદૌ ચાન્તે પઠેદિદમ્ ।
અન્યથા પૂજનાદ્દેવ રમણં મરણં ભવેત્ ॥ ૨૦॥

એકસન્ધ્યાં ત્રિસન્ધ્યાં વા પઠેત્ સ્તોત્રમનન્યધીઃ ।
નિશાયાં સમ્મુખે-શક્ત્યાઃ સ શિવો નાત્ર સંશયઃ ॥ ૨૧॥

ઇતિ નિગમકલ્પદ્રુમે યોનિસ્તોત્રં સમાપ્તમ્ ।

*Yoni Stotram*

pdf was typeset on June 28, 2026

Please send corrections to *sanskrit@cheerful.com*